सम्बन्धविशेषः अखण्डोपाधिर्वेति मतम् तत्रेदमुच्यते कोऽयंस्वरूपसम्बन्धः? किं स्वरूपमेव संबन्धः? स्वरूपस्य वा सम्बन्धः? तत्राद्ये यदि अधिकरणस्वरूपस्यैव सम्बन्धत्वम् आयातं तर्हि अभावस्याधिकरणस्वरूपत्वेन, स्वरूप स्यैवाभावाधिकरणसम्बन्धत्वेन भवताऽपि स्वीकारात्। अन्त्ये कस्य स्वरूपस्य सम्बन्धः? यदि अधिकरणस्य तदा जितं प्राभाकरैः अन्यस्य तथाविधत्वेऽपसिद्धान्तापत्तेः भूतले तदाधारतानुपपत्तेश्च। अखण्डोपाधेरपि अभाववत् प्रमाणसापेक्षतया तद्दोषतादवस्थ्यम् प्रमाणाधीनतयैव पदार्थस्य सिद्धेः सर्व्वसम्मतत्वात् असति प्रमाणे कथं तत्सिद्धिः?। किञ्च अखण्डोपाधित्वस्य भवन्मते कारणतादावपि सत्त्वेनाभावेतरभेदासाधकतया तल्लक्षणत्वायोगः भिन्नभिन्नाखण्डोपाधिस्वीकारे च तस्यापि लक्षणसापेक्षतया तस्य च निर्वक्तुमशक्यतया न तस्याभावलक्षणत्वम्। न च नञ्पदशक्यतावच्छेदकतया तत्सिद्धिः तथाहि अभावस्य अधिकरणस्वरूपत्वे स्वरूपसंबन्धविशेषस्यैव नञ्पदशक्यतावच्छेदकत्वं वाच्यं तदपेक्षया अभावत्वरूपाखण्डोपाधेरेव तथात्वकल्पने लाघवम् इति वाच्यम् कम्बुग्रीवादिमानित्यादौ गुरुधर्म्मेऽपि शक्यतावच्छेदकत्वस्वीकारात् अन्यथा घटः कम्बुग्रीवादिमानित्यादि वाक्यात् शाब्दबोधानुपपत्तिः। उपेयते च सर्वैः गुरुधर्म्मेऽपि शक्यतावच्छेदकत्वम्। अथ शब्दएव अभावे प्रामाणमिति चेत् शब्दवेद्यस्य वन्ध्यापुत्रादेरपि, अतिरिक्ततया कल्पनापत्तेः अथाप्तशब्दएव प्रमाणमिति चेन्न अभावस्य पदार्थान्तरत्वे आप्तवाक्याभावात् भवतां सूत्रकृताऽपि अभावस्य षट्पदार्थातिरिक्ततया काप्यनुक्तेः अभावशब्दमात्रप्रयोगेऽपि तस्याधिकरणस्वरूपत्वेनोपक्षीणत्वात्। एवमतिरिक्ताभावकल्पनपक्षे निरस्तेऽपि स्वपक्षदोषोद्धारमित्थं चक्रुः। अभावस्याधारस्वरूपत्वे भूतले घटोनास्तीत्यादावधिकरणताप्रतीतिः कथं संगच्छतामिति चेत् परेषामिव अत्यन्ताभावस्य नित्यत्वेऽपि घटसत्त्वे घटाभावबुद्धेरनुत्पादे तत्तत्कालीन भूतलादिसम्बन्धस्य नियामकतावत् तत्तत्कालीनभूतलस्वरूपस्यैव अभावपदार्थतया तथाप्रतीतिसम्भवात् तत्तत्कालीनभूतलस्वरूपस्य घटाद्यनवच्छेद्यकालसम्बन्धरूपतया तस्य च भूतले स्वरूपमित्यादिवदाधारताऽक्षतेः। एतेनानन्तसम्बन्धस्वरूपकल्पनापेक्षया एकाभावकल्पने लाघवमित्यपास्तं क्लृप्ततया कालस्य तत्सम्बन्धस्य च सर्व्ववादिसम्मततया अधिकस्याकल्पनात्। भवतामभाव इव तत्रैव सम्बन्धे घटादेः प्रतियोगितयान्वयः कल्प्यते अतो नाधिककल्पना। घटो न पट इत्यादौ घटनिष्ठमेव तत्तत्कालीनतादात्म्यं भेदशब्दार्थस्तत्रैव पटतादात्म्यानुपहितस्य तादात्म्यस्याधिकरणे घटादिस्वरूपे भेदे तादृशसम्बन्धे वा पटादेः प्रतियोगितयान्वये सर्वसामञ्जस्यम्। अतएव "न सोऽस्ति प्रत्ययोलोके यत्र कालो न भासते" इत्युक्तेः सर्वत्र बुद्धौ कालावभास इत्यभियुक्तोक्तिः। भवतामभावभेदबुद्ध्योर्यथा नियमः मन्मतेऽपि तथा। वाय्वादौ रूपाद्यभावचाक्षुषत्वाद्यनुपपत्तिरिष्टैव न च तत्र दृढतरं किञ्चित् प्रमाणमस्तियेन तत्स्वीकारावश्यकतेति"। अभावभेदबुद्ध्योर्नियमाश्च नञ्शब्दे प्रदर्शयिष्यन्ते। सोऽयमभावः बौद्धैः शून्यतया आकाशतया निरावरणतया निरुपाख्यतया च व्यवह्रियते तच्च तन्मतावसरे वक्ष्यते। "अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशय" इति हरिः। "नाभावउपलब्धेः" शा०सू०। "नासतोविद्यते भावो नाभावोविद्यते सतः" इति गीता। यथा च अभावान्न भावोत्पत्तिस्तथा उत्पत्तिशब्दे वक्ष्यते। न्यायादिमते स चाभावः द्विविधः संसर्गाभावः अन्योन्याभावश्चेति भेदात् संसर्गावावश्च ध्वंसप्रागभावात्यन्ताभावभेदात् त्रिविधः। "अभावश्च द्विधा संसर्गान्योन्याभावभेदतः। प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभावएव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" इति भाषा०। प्रागभावश्च उत्पत्तेः प्राक् कारणस्य सूक्ष्मावस्था, उत्पत्तिराविर्भावः, ध्वंसस्तिरोभाव इति सांख्यादयः। २मरणे, मरणञ्च स्वादृष्टारब्धशरीरेण सह जीवस्य विभागः, पूर्व्वसंयोगनाशो वा, प्राणवायोरुत्क्रमणं वा बोध्यम्। भावः आलङ्कारिकोक्तरत्यादिस्थायिभावः ३ तच्छून्ये त्रि०। आन्तरः भावः स्नेहापरपर्य्यायः अनुरागः। ४तद्धीने त्रि०। सचानुरागः देवविषयो भक्तिः पुत्रादिविषयः स्नेहः, पत्यादिविषयः प्रेमेति भेदः। मीमांसकाद्युक्ते अभावग्राहके ६ योग्यानुपलब्धिरूपे प्रमाणे ७ असत्त्वे, अविद्यमानत्वे च। नास्ति भावः सत्त्वं यस्य। ८मिथ्याभूते त्रि०। [तुमशक्ये च।

**अभावनीय** त्रि० न०त०। १ चिन्तयितुमशक्ये २उत्पादयि-

**अभावसम्पत्ति** स्त्री अभावस्य मिथ्याभूतस्य सम्पत्तिः। १ मिथ्याभूतपदार्थज्ञाने अध्यासे यथा शुक्तिकायां रजतज्ञानं तत्र च यथा मिथ्याभूतस्यैव ज्ञानं तयोक्तमध्यासशब्दे।

**अभाषण** न० अभावे न०त०। भाषणाभावे मौनभावे।

**अभि** अव्य० न भाति भा—बा०कि। १ कञ्चित् प्रकारं प्राप्तस्य